# ॥ वाल्मीकि रामायण ॥

## ६ युद्धकाण्ड

### अध्याय ७५

विभीषण वचः श्रुत्वा रावणिः क्रोधमूर्छितः ।
अब्रवीत्परुषं वाक्यं वेगेनाभ्युत्पपात ह ॥ १ ॥

उद्यतायुधनिस्त्रिंशो रथे तु समलङ्कृते ।
कालाश्वयुक्ते महति स्थितः कालान्तकोपमः ॥ २ ॥

महाप्रमाणमुद्यम्य विपुलं वेगवद्दृढम् ।
धनुर्भीमं परामृश्य शरांश्चामित्रनाशनान् ॥ ३ ॥

उवाचैनं समारब्धः सौमित्रिं सविभीषणम् ।
तांश्च वानरशार्दूलान्पश्यध्वं मे पराक्रमम् ॥ ४ ॥

अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदम् ।
मुक्तं वर्षमिवाकाशे वारयिष्यथ संयुगे ॥ ५ ॥

अद्य वो मामका बाणा महाकार्मुकनिःसृताः ।
विधमिष्यन्ति गात्राणि तूलराशिमिवानलः ॥ ६ ॥

तीक्ष्णसायकनिर्भिन्नाञ्शूलशक्त्यृष्टितोमरैः ।
अद्य वो गमयिष्यामि सर्वानेव यमक्षयम् ॥ ७ ॥

क्षिपतः शरवर्षाणि क्षिप्रहस्तस्य मे युधि ।
जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः ॥ ८ ॥

तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं लक्ष्मणस्तदा ।
अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत् ॥ ९ ॥

उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया ।
कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान् ॥ १० ॥

स त्वमर्थस्य हीनार्थो दुरवापस्य केन चित् ।
वचो व्याहृत्य जानीषे कृतार्थोऽस्मीति दुर्मते ॥ ११ ॥

अन्तर्धानगतेनाजौ यस्त्वयाचरितस्तदा ।
तस्कराचरितो मार्गो नैष वीरनिषेवितः ॥ १२ ॥

यथा बाणपथं प्राप्य स्थितोऽहं तव राक्षस ।
दर्शयस्वाद्य तत्तेजो वाचा त्वं किं विकत्थसे ॥ १३ ॥

एवमुक्तो धनुर्भीमं परामृश्य महाबलः ।
ससर्ज निशितान्बाणानिन्द्रजित्समिजिञ्जय ॥ १४ ॥

ते निसृष्टा महावेगाः शराः सर्पविषोपमाः ।
सम्प्राप्य लक्ष्मणं पेतुः श्वसन्त इव पन्नगाः ॥ १५ ॥

शरैरतिमहावेगैर्वेगवान्रावणात्मजः ।
सौमित्रिमिन्द्रजिद्युद्धे विव्याध शुभलक्षणम् ॥ १६ ॥

स शरैरतिविद्धाङ्गो रुधिरेण समुक्षितः ।
शुशुभे लक्ष्मणः श्रीमान्विधूम इव पावकः ॥ १७ ॥

इन्द्रजित्त्वात्मनः कर्म प्रसमीक्ष्याधिगम्य च ।
विनद्य सुमहानादमिदं वचनमब्रवीत् ॥ १८ ॥

पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः ।
आदास्यन्तेऽद्य सौमित्रे जीवितं जीवितान्तगाः ॥ १९ ॥

अद्य गोमायुसङ्घाश्च श्येनसङ्घाश्च लक्ष्मण ।
गृध्राश्च निपतन्तु त्वां गतासुं निहतं मया ॥ २० ॥

क्षत्रबन्धुः सदानार्यो रामः परमदुर्मतिः ।
भक्तं भ्रातरमद्यैव त्वां द्रक्ष्यति मया हतम् ॥ २१ ॥

विशस्तकवचं भूमौ व्यपविद्धशरासनम् ।
हृतोत्तमाङ्गं सौमित्रे त्वामद्य निहतं मया ॥ २२ ॥

इति ब्रुवाणं संरब्धं परुषं रावणात्मजम् ।
हेतुमद्वाक्यमत्यर्थं लक्ष्मणः प्रत्युवाच ह ॥ २३ ॥

अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस ।
कुरु तत्कर्म येनाहं श्रद्दध्यां तव कत्थनम् ॥ २४ ॥

अनुक्त्वा परुषं वाक्यं किं चिदप्यनवक्षिपन् ।
अविकत्थन्वधिष्यामि त्वां पश्य पुरुषादन ॥ २५ ॥

इत्युक्त्वा पञ्चनाराचानाकर्णापूरिताञ्शरान् ।

निचखान महावेगाँल्लक्ष्मणो राक्षसोरसि ॥ २६॥

स शरैराहतस्तेन सरोषो रावणात्मजः ।
सुप्रयुक्तैस्त्रिभिर्बाणैः प्रतिविव्याध लक्ष्मणम् ॥ २७॥

स बभूव महाभीमो नरराक्षससिंहयोः ।
विमर्दस्तुमुलो युद्धे परस्परवधैषिणोः ॥ २८॥

उभौ हि बलसम्पन्नावुभौ विक्रमशालिनौ ।
उभावपि सुविक्रान्तौ सर्वशस्त्रास्त्रकोविदौ ॥ २९॥

उभौ परमदुर्जेयावतुल्यबलतेजसौ ।
युयुधाते महावीरौ ग्रहाविव नभो गतौ ॥ ३०॥

बलवृत्राविव हि तौ युधि वै दुष्प्रधर्षणौ ।
युयुधाते महात्मानौ तदा केसरिणाविव ॥ ३१॥

बहूनवसृजन्तौ हि मार्गणौघानवस्थितौ ।
नरराक्षससिंहौ तौ प्रहृष्टावभ्ययुध्यताम् ॥ ३२॥

सुसम्प्रहृष्टौ नरराक्षसोत्तमौ
जयैषिणौ मार्गणचापधारिणौ ।
परस्परं तौ प्रववर्षतुर्भृशं
शरौघवर्षेण बलाहकाविव ॥ ३३॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com